International Journal of Sanskrit Research 2022; 8(4): 212-216

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 212-216
© 2022 IJSR
www.anantaajournal.com
Received: 01-05-2022
Accepted: 04-06-2022

**मोहित जोशी**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

**Corresponding Author:**
**मोहित जोशी**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

# कच्छवंशमहाकाव्ये अलङ्कारतत्त्वविमर्शः

**मोहित जोशी**

## प्रस्तावना

भारतीयवाङ्मये ब्रह्मयज्ञधर्मकर्मादिशब्दवदत्यन्तं सुप्रसिद्धो वर्तते 'साहित्य'शब्दः । संस्कृतकाव्यशास्त्रेऽस्य महती परम्परा वर्तते । अनादिकालादेव प्रवर्त्तमानेऽस्मिन् चराचरात्मके संसारे मानवः सुखस्यान्वेषणे संलग्नो दृश्यते । मननशीलाः खलु मानवा आत्यन्तिकदुःखनिवृत्तिपुरस्सरं [1] ब्रह्मानन्दावाप्तिं [2] कामयन्ते । द्विविधा मानवाः- परिणतबुद्धयः, सुकुमारमतयश्चेति । तेषु परिणतबुद्धीनां कृते प्रभुसम्मितं वेदपुराणादीनामुपदेशमृषयः चक्रुः । सुकोमलधियां कृते एतन्न, तेषां कृते तु चतुर्वर्गबोधाय सन्मार्गोपदेशाय च साहित्यविद्या प्रोक्ता । उक्तञ्च साहित्यदर्पणे विश्वनाथेन-

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते"॥ [3]

काव्यस्यापरपर्यायरूपेण प्रतिष्ठिता साहित्यविद्या नाम चतसृणां विद्यानां सारभूता पञ्चमी विद्या, सप्तमं वेदाङ्गञ्च । उक्तमाचार्यराजशेखरेण "पञ्चमी साहित्यविद्येति यायावरीयः । सा हि चतसृणामपि विद्यानां निस्यन्दः" [4]। साहित्यविद्यायाः कृते काव्यालङ्कारः [5], अलङ्कारशास्त्रम्, काव्यशास्त्रम [6], साहित्यशास्त्रम् [7] इत्यादीनि नामानि प्रतिष्ठितानि

---

1 "आत्यन्तिकोदुःखत्रयाभावःकैवल्यम्"। सांख्यतत्वकौमुदी

2 भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः। क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरे"॥ मुण्डाकोपनिषद्, २/२/८

3 सा.द.- १

4 का.मी- २

5 "प्रारम्भिकयुगेसर्वैराचार्यैः स्वग्रन्थानां नाम काव्यालङ्कारेति स्थापितम् । यथा- भामहः- काव्यालङ्कारः, उद्भटः- काव्यालङ्कारसारसङ्ग्रहः, वामनश्चकाव्यालङ्कारसूत्राणीति" । आचार्यविश्वेश्वरः काव्यप्रकाशः, भूमिका, पृ० १

6 काव्यसौन्दर्यविश्लेषकशास्त्रं नाम काव्यशास्त्रमिति - "काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च । काव्येतिहासः शास्त्रेतिहासस्तदपिषड्-विधम्" ॥ स.कण्ठा -२/१३

7 "शब्दार्थौसहितौकाव्यम्"- का०अ०, १/१६

सन्ति । एवम्भूतायां साहित्यविद्यायां काव्यसौन्दर्यस्यविश्लेषणं क्रियते । प्राचीनकालादेव कविकाव्यशब्दयोर्यत्र-तत्र प्रयोगः लभ्यत एव । साम्प्रतं किं नाम काव्यमित्यप्वगन्तव्यं चेदुक्तञ्च काव्यप्रकाशे- “काव्यं लोकोत्तरवर्णनानिपुणस्य कवे कर्म” इति ।

महाकाव्यं हि संस्कृतसाहित्यजगतः सर्वोत्कृष्टं रत्नम् । महाकाव्यस्य लक्षणं बहुभिराचार्यैः बहुधा प्रतिपादितमस्ति। तत्र च भेदोऽपि दृश्यते । महाकाव्यलक्षणं कविराजविश्वनाथः विस्तृततया निरूपयति । यद्यथा –

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा.................. सर्गनाम तु[8] ॥

सप्तदशसर्गेषु निबद्धं कच्छवंशमहाकाव्यमिदमैतिहासिकवस्तुसंवलितं सदपि महाकाव्यगुणोपेतं सहृदयहृदयाह्लादनक्षमं च वर्तते । कवेर्नैकशास्त्रनैपुण्यं प्रकटयदिदं महाकाव्यमैतिहासिकघटनास्तिथिपुरस्सरं प्रस्तौतीति न केवलं काव्यप्रणयिनां कृतेऽस्योपयोगित्वम्, अपि तु ऐतिह्यविदां कृतेऽपीत्यपरोऽयमस्य विशेषः । रघुवंश-शिशुपालवध-ईश्वरविलासादिमहाकाव्यानां प्रभावोऽत्र बहुत्राऽवलोक्यते । कच्छवंशमहाकाव्येऽस्मिन् शब्दालङ्काराः अर्थालङ्काराश्च वर्तन्त एव । परन्तु आधिक्येन शब्दालङ्कारा एव परिलक्ष्यन्ते । अर्थालङ्कारेषु उपमा-उत्प्रेक्षा-स्वभावोक्ति-रूपकाद्यलङ्काराणां समावेशः कच्छवंशमहाकाव्ये सम्प्राप्यते । वीरोऽत्र प्रधानो रसः । शृङ्गारद्यऽन्ये रसा अपीह तत्तत्प्रसङ्गेषु दृश्यन्ते । महाकव्येऽस्मिन् प्राप्तानि प्रकृतिवर्णनादीनि महाकवेरस्य भौगोलिकपरिस्थितिज्ञानमपि पुरस्कुर्वन्ति । वीररौद्रयोर्वर्णने नूनं विशिष्यतेऽयं कविः । वैद्यः श्रीकृष्णरामभट्टः प्राचीनानां जयपुरराजपण्डितानां तेषां कृतीनां चापि परिचयं यथाप्रसङ्गं प्रस्तौति । हरिजीवनमिश्रो माधवभट्टः सम्राड् जगन्नाथो रत्नाकरपुण्डरीकस्तथा च तत्सदृशा अनेके महामनीषिणोऽत्र यथाप्रसङ्गं स्मृताः सुकविनाऽनेनेति तत्कालीनपण्डितप्रवराणां संस्कृतपरम्पराणां समृद्धये तैः सम्पादितसारस्वताध्वराणां च परिज्ञानाय ग्रन्थोऽयं सुमहान्कोशः ।

**अलङ्कारतत्त्वविमर्शः** अलङ्क्रियतेऽनेनेति अलङ्कारः । यथा आभूषणेन नायिकायाः शोभासौंदर्यादिकं वर्धते तथैव अलङ्कारैः काव्यस्य शोभा वर्धते । भामहाचार्यादारभ्य रुद्रटं यावत् सर्वेषामपि आलङ्कारिकाणां मतमिदं यत्सर्वेषु काव्यतत्त्वेषु अलङ्कारतत्त्वस्य प्राधान्यं वर्तत एव । अलङ्कारस्य सामान्यं लक्षणं निरूपयति मम्मटाचार्यः । यथा –

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवलङ्कारास्तेऽनुप्रासोपमादयः[9] ॥

साहित्यदर्पणकारः कविराजविश्वनाथः अलङ्कारस्वरूपम् इत्थं निरूपयति –

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्[10] ॥

"अलङ्करोतीत्यलङ्कारः। [11] अलङ्क्रियतेऽनेनेति अलङ्कारः। यद्यपि अलङ्कारशास्त्रं सर्वप्राचीनं वर्तते, यतोहि वेदेष्वलङ्काराणां प्रयोगोबहुधा क्रियते । यत्र-तत्र उपमा रूपकाद्यलङ्कारमाध्यमेन जीवपरमात्मनोर्वैशिष्ट्यं वर्तते । पुनः पाणिनिविरचिते अष्टाध्यायीनामके व्याकरणशास्त्रग्रन्थेऽपि उपमालङ्कारप्रयोगो दृश्यते । यास्कप्रणीत निरुक्तेऽपि उपमादिवाचकशब्दानां कथनं प्राप्यते । पुनः रामायणमहाभारतादिमहाकाव्येष्वपि अलङ्काराणां बहुधा प्रयोगो वर्तते । प्रथमतया आचार्यभरतमुनिना नाट्यशास्त्रे चत्वारोऽलङ्काराः स्वीकृताः । परं षष्ठ्यां शताब्द्यां भामहेन स्पष्टरूपेण अलङ्कारस्यात्मत्वं स्वीकृतम्, तेनकाव्येष्वलङ्काराणामावश्यकस्थितिः स्वीकृता । उक्तं यत्-

“रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्”॥ [12]

भामहमतेऽलङ्काराणामात्मत्वं यद्यपि वर्त्तते, तथापि येतेषां बाह्यत्वं स्वीकुर्वन्ति, ते संज्ञाक्रिययोः सौन्दर्यमेव वाचोऽलङ्कारं स्वीकुर्वन्ति । यथोक्तम्-

“रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचावाञ्छन्त्यलङ्कृतिम्”॥ [13]

8 साहित्यदर्पणम् – ६/३१६-३५१

9 का.प्र.- ८/६७

10 सा.द.- १०१-

11 कर्मण्यण् (पाणिनीयाष्टाध्यायी, ३.२.१)

12 काव्यालङ्कारः, १.१३

वामनाचार्येणापि यद्यपि रीतेरात्मत्वं स्वीकृतम्तथापि तस्यमतेकाव्यान्यलङ्कारेणैव स्वीकृतानि भवन्ति[14], तदा सोऽलङ्कारः सौन्दर्यमेव ।[15] अतः वामनमतेऽपि अलङ्काराणां महत्त्वं वर्तते । पुनः दण्डि-रुद्रट-उद्भटादयोऽपि अलङ्कारस्यात्मत्वं स्वीकुर्वन्ति । यद्यपि पुनः ध्वनिकारेण अलङ्काराणां ध्वनावन्तर्भावः कृतः, परं पुनः कुन्तकेन ध्वनिखण्डनं कृत्वा वक्रोक्त्यामेवध्वनेः स्थितिः स्वीकृता । मम्मटेनकाव्यात्मभूतस्य रसस्योपकारकर्तृत्वेन यत्रकुत्रापि अलङ्काराभावेऽपि काव्यत्वं यद्यपि स्वीकृतम्, परं चन्द्रालोककारेण जयदेवेन तस्य मतं खण्डयता उक्तम् –

"अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती" ॥ [16]

पुनः विश्वनाथेनापि अलङ्कारस्य आत्मोपकारकत्वं स्वीकृतम् । पुनरन्याचार्यैरपि रसस्योपकारकर्तृत्वमेव स्वीकृतम् अलङ्काराणाम् । अलङ्कारवाद्येतराचार्याणां मते यद्यपि अलङ्काराणामात्मत्वं नास्ति, तथापि शनैः- शनैः सर्वाचार्यैरलङ्काराणां सङ्ख्याः क्रमेण अधिकाः स्वीकृताः । यथा- भरतेन ४, भामहेन ३८, दण्डिना ३९, वामनेन ३५, रुद्रटेन ६८, उद्भटेन ४१, मम्मटेन ६८, रुय्यकेन ७८, कुन्तकेन २०, भोजेन ७२, जयदेवेन १००, अप्पयदीक्षितेन १२४ अलङ्काराः स्वीकृताः, अनेन प्रकारेण अलङ्कारसङ्ख्याऽपिवर्धिता । अनेनापि सिध्यति यद् अलङ्कारान्तराचार्यैः स्पष्टरूपेण अलङ्काराणामात्मत्वं न स्वीकृतम्, अलङ्कारत्रिविधः – शब्दालङ्कारः – यत्र शब्दस्य प्राधान्यं भवति । यथा – अनुप्रास-यमक-श्लेष-वक्रोक्ति इत्यादयः । यत्रार्थप्राधान्यं तत्रार्थालङ्कारः । यथा उपमारूपकादयः । तृतीयः उभयालङ्कारः यथा – श्लेषः ।

**शब्दालङ्काराः**

यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा[17] ॥

13 काव्यालङ्कारः, १.१४

14 काव्यं ग्राह्यम् अलङ्कारात्, काव्यालङ्कारसूत्रवृत्तिः, १.१

15 सौन्दर्यमलङ्कारः, काव्यालङ्कारसूत्रवृत्तिः, १.२

16 चन्द्रालोकः, १/८

17 का.प्र.-१०-३९

**अनुप्रासः**

शब्दालङ्कारेषु अनुप्रासस्य महत्त्वपूर्णं स्थानं वर्तते । अयमलङ्कारो नादव्यञ्जनायाः प्रकटीकरणे सहायको जायते। अनुप्रासस्य सम्बन्धः पद्ये प्रयुक्तैः व्यञ्जनवर्णैः सह भवति, यत्र स्वरवैभिन्न्येऽपि व्यञ्जनसाम्यं भवेत् तत्रानुप्रासोऽलङ्कारो भवति । मम्मटाचार्यानुसारेण 'वर्णसाम्यमनुप्रासः' इति । साहित्यदर्पण मते -
अनुप्रासः शव्दसाम्यं वैषम्येऽपि स्वरस्य यत्[18] ।
अर्थात् स्वरस्य वैषम्येऽपि यत्रकेवलं ङ्व्यञ्जनवर्णेषु समता स्यात् सोऽनुप्रासः कथ्यते । कच्छवंशमहाकाव्ये अनुप्रासालङ्कारस्योदाहरणम् –

अखिलं खलु तत्छुत्वा खेलनस्य विखण्डनम् ।
खिलीकृत्खलं खेलत्खड्गमस्तौज्जयं प्रभुः[19] ॥
स्वच्छरत्नच्छटोच्छुनच्छत्रविच्छित्तिविच्छुरः ।
पार्श्ववर्तिद्विपासीनैर्धूतपिच्छो मुहुर्नृपैः[20] ॥

**अर्थालङ्कारः**

**उपमा –** काव्यप्रकाशे उपमायाः लक्षणं ईदृशं वर्तते - साधर्म्यमुपमा भेदे[21] । अर्थात् यत्र उपमानोपमेययोः एवं साधर्म्यं इत्यनयोः समानधर्मेण सम्बन्धः यत्र-तत्रोपमालङ्कारः । उपमानोपमेययोः साधारणधर्मोपमा प्रतिपादकानामुपादानेन पूर्णा, एकस्य द्वयो त्रयाणां वा अवयवानां लोपे लुप्ता, चेति भेदेन द्विधा, पूर्णा च वाक्ये समासे तद्धिते च श्रौती-आर्थी चेति भेदेन द्विधा भवति । कच्छवंशमहाकाव्ये उपमालङ्कारस्योदाहरणम् –

उच्चैर्हस्तिनमारूढः श्रीमानीश्वरपार्थिवः ।
वृद्धश्रवा इव बभावास्थितोऽभ्रमुवल्लभम्[22] ॥
उद्यद्धूलीतमस्तोमस्तिमितासु दिशास्वभुः ।
शक्तयो वीरदोर्दण्डप्रचण्डा दीपिका इव[23] ॥

**रूपकम्:** यत्र उपमानोपमेययोः भेदरहित-आरोपो भवति तत्र रूपकोऽलङ्कारः वर्तते । एतस्य लक्षणं काव्यप्रकाशे इत्थं वर्तते –

तद्रूपकमभेदो य उपमानोपमेययोः[24] ।

18 सा.द.-१०

19 कच्छवंशमहाकाव्यम् – १०/३००

20 कच्छवंशमहाकाव्यम् – द्वादश१२२ - त्रयोदशसर्गौ-

21 का.प्र. १०२५/

22 कच्छवंशमहाकाव्यम् – द्वादश६२- त्रयोदशसर्गौ-

23 कच्छवंशमहाकाव्यम् – द्वादश६३- त्रयोदशसर्गौ-

कच्छवंशमहाकाव्ये रूपकालङ्कारस्योदाहरणम् –

करवालकरास्तत्ररणरङ्गधरा नटाः[25] ।
उन्मूलयन्द्विषवृक्षांस्तरस्वी मानमारुतः[26] ॥
तव प्रतापसूर्येण यशश्चन्द्रेण चोद्यता ।
बोद्धुं निद्रातुमपि वा पङ्कजानि प्रपेदिरे[27] ॥

**उत्प्रेक्षा:** यत्र वाक्ये मन्ये, शङ्के, ध्रुवम्, प्रायः, नूनम्, अवैमि, सम्भावयामि, उत्प्रेक्षे स्यादित्यादिभिः शब्दैः क्रियापदान्तरमिव शब्देन च सम्भावना क्रियते तत्रोत्प्रेक्षालङ्कारः भवति । एतस्य लक्षणं मम्मटाचार्येण काव्यप्रकाशे इत्थमुक्तम् -

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्[28] ।

अर्थात् यस्य वर्णनीय वस्तुनः सम्भावना उपमानेन सह यत्र क्रियते तत्र उत्प्रेक्षालङ्कारः भवति । कच्छवंशमहाकाव्ये अनुप्रासालङ्कारस्योदाहरणम् –

सर्वत्र चारिणी कीर्तिर्वृद्धेषा श्रीरहं युवा ।
इति निश्चित्य स प्रायः परिणेतुं प्रचक्रमे[29] ॥
कुमारशब्दभागेव जगत्सिंहो व्यपद्यत ।
प्रायः पुरुषरत्नानि द्रष्टुं न क्षमते विधिः[30] ॥

**सहोक्तिलङ्कारः** एकस्य अर्थस्य अभिधायकः सन्सहार्थवलेन यदुभयस्यापि अवगमको भवति तत्र सहोक्तिरलङ्कारो जायते । काव्यप्रकाशे मम्मटाचार्यः अलङ्कारस्यास्य लक्षणमित्थं निगदति – “ सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्”[31] । कविराजविश्वनाथोल्लिखिति यत् –

सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदाभवेत्[32] ॥

24 का.प्र. – १०/१२९
25 कच्छवंशमहाकाव्यम् –८/११८ (पूर्वार्द्धः)
26 कच्छवंशमहाकाव्यम् –८/१२४ (पूर्वार्द्धः)
27 कच्छवंशमहाकाव्यम् –१०/९२
28 का.प्र. – १०१३७/
29 कच्छवंशमहाकाव्यम् –५/५
30 कच्छवंशमहाकाव्यम् –८/२७
31 का.प्र. – ९१२५/
32 सा.द-१०/५४

कच्छवंशमहाकाव्ये सहोक्त्यलङ्कारस्योदाहरणम् –

शरशीर्णशिरोमर्मनिर्यल्लोहितलोहितः ।
पपात मूर्च्छितः कच्छः साकं स्वसुहृदश्रुभिः[33] ॥

**विषमालङ्कारः** यत्र कारणविरूपकार्योत्पत्तिः वर्ण्यते, यत्र वा अननुरूपयोः घटना प्रतीयते, यत्र वा इष्टार्थमुद्यतस्य अनिष्टावाप्तिः निवध्यते तत्र सर्वत्र विषमालङ्कारः भवति । साहित्यदर्पणकारानुसारेणास्य लक्षणमित्थं वर्तते ।

गुणौ क्रिये वा चेत्स्यतां विरुद्धं हेतु कार्ययोः ।
यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः ।
विरूपयोः सङ्घटना या च तद्विषमं मतम्[34] ॥

कच्छवंशमहाकाव्ये विषमालङ्कारस्योदाहरणम् –

क्व ते सोऽर्कवरो बन्धुः क्वते भ्राता स माधवः ।
इत्याक्षिप्य शरैमार्नं सीसादाः समवाकिरन्[35] ॥

**असङ्गति अलङ्कारः** यत्र कार्यकारणभूतधर्मद्वयस्य भिन्नदेशतया सह प्रतीतिः यत्र भवति तत्र असङ्गत्यलङ्कारः भवति । काव्यप्रकाशानुसारेण लक्षणं भवति –

भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः [36] ॥

**विश्वनाथस्य लक्षणम्**

कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः[37] ।

कच्छवंशमहाकाव्ये असङ्गत्यलङ्कारस्योदाहरणम् –

रणक्षेत्रेष्वविश्रान्तं शरधारा ववर्ष सः ।
चित्रं पुनरमित्राणां गृहेषु तृणजन्म यत्[38] ॥

33 कच्छवंशमहाकाव्यम् – १०/३६९
34 सा.द.१०/७०
35 कच्छवंशमहाकाव्यम् – ७/१२५
36 का.प्र. – १०/११०
37 सा.द.-१०
38 कच्छवंशमहाकाव्यम् –९/७

यथा यथा पताकिन्याः पताकाभिः प्रकम्पितम् ।
तथा तथा सपत्नानां पङ्क्तिभिश्च प्रकम्पितम्[39] ॥

**सन्देहालङ्कारः** उपमेयस्य उपमानयोः सह समानकोटिकसंशयः सन्देहालङ्कारः कथ्यते । काव्यप्रकाशे एतस्य लक्षणमित्थं ब्रवीति आचार्यः – "ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः"[40] । दर्पणकारः ब्रवीति - सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः41 ।
कच्छवंशमहाकाव्ये सन्देहालङ्कारस्योदाहरणम् –

किमेष मिरजोपाधिर्जयसिंहो महामहाः ।
वैरनिर्यातनं प्रेप्सुः प्रसवं पुनराश्रितः[42] ॥
वहन्सुदर्शनं वज्रवलयं दोष्णि दुर्धरम् ।
विष्णुः किमेष जिष्णुर्वा तेनाऽतर्कि तदा नृपः[43] ॥

**सहायकग्रन्थसूची**

1. कच्छवंशमहाकाव्यम्' (वैद्यश्री भट्टः कृष्णरामः) (सम्पादकौ-डॉ. पाण्डेयः रमाकान्तः, डॉ.दाधीच रानी) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथम संस्करण-२०१२
2. काव्यप्रकाशः – मम्मट कृष्णदास अकादमी, वाराणसी, १९९७
3. काव्यमीमांसा राजशेखरः चौखम्बा विद्याभवनम् वाराणसी, २०१३
4. चन्द्रालोकः – सुधाव्याख्या (जयदेवः), चौखम्बाकृष्णदास अकादमी,१९९६
5. मुण्डकोपनिषद्- गोविन्दभवन-कार्यालय,गीताप्रेस, गोरखपुर
6. काव्यालङ्कारसूत्राणि ,(वामनः) चौखम्बाविद्याभवन,वाराणसी,१९९५ (द्वि.सं.)
7. अष्टाध्यायी डॉ नरेश झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००६
8. साहित्यदर्पणम् लक्ष्मीव्याख्या (शर्मा कृष्णमोहनः), चौखम्बासंस्कृतसंस्थान, वाराणसी, २००१
9. सरस्वतीकण्ठाभरणम् – भोजराज – निर्णयसागर प्रेस, मुम्बई- १९३४

---

39 कच्छवंशमहाकाव्यम् – द्वादश३३ - त्रयोदशसर्गौ-

40 का.प्र. – १०१३७/

41 सा.द.-१०

42 कच्छवंशमहाकाव्यम् –१०/२८०

43 कच्छवंशमहाकाव्यम् – १०/११३